# आदर्श–प्रशनपत्रम्
# हाईस्कूल परीक्षा–2012
# संस्कृतम् (सामान्यम्)

समय : घंटात्रयम् पूर्णाङ्काः 100

निर्देशा :– (i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

1. उचितविकल्पं चित्वा लिखत– 4

(क) 'परोपकारः' इत्यस्मिन् पदे सन्धिः अस्ति–

(अ) अयादिसन्धिः (ब) गुणस्वरसन्धिः

(स) वृद्धिस्वरसन्धिः (द) यणस्वरसन्धिः

(ख) 'सत्+शीलः' इत्यस्य सन्धिः अस्ति–

(अ) सत्शीलः (ब) सत्छीलः

(स) सच्छीलः (द) सचछीलः

(ग) 'मनोहरः' इत्यस्य सन्धिविच्छेदः अस्ति–

(अ) मन+हरः (ब) मनः+हरः

(स) मनो+हरः (द) मनस्+हरः

(घ) विसर्गसन्धेः उदाहरणम् अस्ति–

(अ) महेशः (ब) जगन्नाथः

(स) गायकः (द) दुस्थलः

2. (क) 'हरिहरौ' इत्यस्य समासविग्रहः भवति– 3

(अ) हरि च हरौ (ब) हरि च हरौ च

(स) हरिश्च हरश्च (द) हरि हरौ च

(ख) अव्ययीभावसमासस्य उदाहरणम् अस्ति–

(अ) पत्रचपात्रम् (ब) महापुरूषः

(स) अनुरूपम् (द) चन्द्रशेखरः

(ग) ''पीताम्बरः इत्यस्मिन् पदे समासः अस्ति–

(अ) द्विगुसमासः (ब) बहुब्रीहिसमासः

(स) द्वन्द्वसमासः (द) कर्मधारयसमासः

3. (क) 'गच्छेत्' इत्यस्मिन् पदे लकारः अस्ति– 4

(अ) लट् (ब) लृट्

(स) विधिलिङ्ग (द) लोट्

(ख) 'याचेयम्' इत्यत्र धातुः अस्ति–

(अ) याचस् (ब) याच्

(स) यच् (द) याचत्

(ग) अधोलिखितेषु लट्लकारः अस्ति–

(अ) पठतु (ब) अपठत्

(स) पठन्ति (द) पठेत्

(घ) 'करिष्यामि' इत्यस्मिन् पदे वचनम् अस्ति–

(अ) बहुवचनम् (ब) एकवचनम्

(स) द्विवचनम् (द) किमपि नास्ति

4. (क) अधोलिखितेषु अव्ययम् अस्ति– 4

(अ) यावत् (ब) रमा

(स) हरि (द) साधु

(ख) 'मनः जाग्रत कुत्र उदैति' अस्मिन् वाक्ये अव्ययम् अस्ति–

(अ) मनः (ब) जाग्रत

(स) कुत्र (द) उदैति

(ग) अधोलिखितेषु उपसर्गः नास्ति–

(अ) अनु (ब) अव

(स) अप (द) अस्

(घ) 'प्रतिवादः' इत्यस्मिन् पदे उपसर्गः अस्ति–

(अ) वादः (ब) प्रति

(स) प्र (द) परि

5. (क) 'कथ्+क्तवतु' इत्यस्य पदम् भविष्यति– 4

(अ) कथवतु (ब) कथितवतु

(स) कथवत् (द) कथितवान्

(ख) 'ल्यप्' प्रत्ययस्योदाहरणम् अस्ति–

(अ) गतः (ब) पठत

(स) आदाय (द) कर्त्तव्यः

(ग) अधोलिखितेषु 'शानच्' प्रत्ययः अस्ति–

(अ) कथितः (ब) कथनीयम्

(स) वर्धमानः (द) गतवान्

(घ) 'बाला' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(अ) टाप् (ब) ङीप्

(स) ङीष् (द) ङीन्

6. निम्नलिखितासु द्वयोः पद पूर्तिं कृत्वा सूक्तिनिर्माणं कुरूत– 2

(क) ––––––––––– नास्ति मूर्खत्वम्। (पठतो / जपतो)

(ख) परसदन निविष्टः को––––––––– न याति।(गुरूत्वं / लघुत्वं)

(ग) –––––––कर्त्तव्यः प्राणैः कण्ठगतैरपि। (परोपकारः / परापकारः)

7. युग्ममेलनं कुरुत – 4

| | 'अ' | 'आ' |
|---|---|---|
| (क) | मार्कण्डेयः | वाल्मीकिना |
| (ख) | बालैः सह सख्यम् | प्रसिद्धाः |
| (ग) | आदिकविना | मुनिः |
| (घ) | महापुरूषाः | न कुर्यात् |

8. शुद्धवाक्यानां समक्षंम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत– 4

(क) कुले लोके च अनुजः श्रेष्ठः भवति। ( )

(ख) सर्वकालविचारी न भवेत्। ( )

(ग) शुद्धोदनः शाक्यवंशीयः न आसीत्। ( )

(घ) संस्कृतं विश्वस्य महत्तमा भाषा अस्ति। ( )

9. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्य–पुस्तकात् सुभाषित–द्वयं लिखत– 4

10. प्रदत्तैः शब्दैः रिक्त–स्थानानि पूरयत– 4

(परिणामेन, धनहीनः, पापेऽपि, यशः)

(1) न———————— पापी स्यात्।

(2) कृतकृत्यशरीर में ————————— जर्जरम्।

(3) महर्षिः————————— शरीरेण अमरः अस्ति।

(4) ————————— न हीनश्च।

11. अधोलिखितेषु चतुर्णां प्रश्नानाम् उत्तराणि त्रिषु वचनेषु लिखत— 4

(क) बालक – चतुर्थी विभक्तिः –

(ख) युष्मद् – प्रथमा विभक्तिः –

(ग) नामन् – तृतीया विभक्तिः –

(घ) कवि – पञ्चमी विभक्तिः –

(ङ.) माला – सप्तमी विभक्तिः –

12. अधोलिखितेषु चतुर्णां प्रश्नानाम् उत्तराणि एकपदेन लिखत— 4

(क) प्रकृतिदत्तः वरः कः ?

(ख) पुरूषादः कः आसीत् ?

(ग) भारतीयैकता साधकं किम् ?

(घ) महाभारतस्य प्रणयनं केन कृतम् ?

(ङ.) छत्रसालस्य पितुः नाम किम् ?

13. अधोलिखितेषु त्रयाणां प्रश्नानाम् उत्तराणि एकवाक्येन लिखत— 6

(क) मैत्रेयी सीतां केषां ज्ञानं दत्तवती ?

(ख) विदिशा कस्मिन् प्रदेशे स्थिता विद्यते ?

(ग) कृषीबलैः काः समेधिताः भवन्तु ?

(घ) मे मनः किम् अस्तु ?

14. अधोलिखितेषु पञ्च अशुद्धकारकवाक्यानां शुद्धिः करणीया— 5

(क) सर्वे बालकाः धावति।

(ख) पत्राः पतन्ति।

(ग) श्री रामम् नमः।

(घ) बालकं मोदकं रोचते।

(ङ.) जलस्य बिना जीवनं नास्ति।

(च) बालकः जनकस्य सह गच्छति।

15. अधोलिखितेषु गद्यांशद्वयं पठित्वा प्रश्नानाम् उत्तराणि लिखत— 10

(क) कस्मिंश्चित् ग्रामे एकः प्राचीनः विशालः च न्यग्रोधवृक्षः आसीत्। सः पशुपक्षिभ्यः बहुविधेभ्यः जीव–जन्तुभ्यः मनुष्येभ्यः अपि नित्यं बहूपकारकः आसीत्। पथिकाः तस्य वृक्षस्य छायायां पाथेयं भक्षयित्वा मार्गायासं परिहरन्ति स्म। पशवः छायार्थं वृक्षमिमम् आश्रयन्ति स्म। पक्षिणः तस्य शाखासु नीडानि विरच्य वसन्ति स्म। सर्पाश्च तत्रत्येषु वल्मीकेषु वासं कुर्वन्ति स्म। एवं स वृक्षः सर्वप्रियः सर्वहितः सर्वापेक्षितः च आसीत्।

(अ) न्यग्रोधवृक्षः कुत्र आसीत् ?

(ब) के मार्गायासं परिहरन्ति स्म ?

(स) पशवः छायार्थं कुत्र आश्रयन्ति ?

(द) 'विरच्य' शब्दस्य धातु प्रत्ययं च पृथक् कुरुत।

(इ) 'ग्रामे' शब्दे का विभक्तिः अस्ति ?

(ख) ततः स नित्यमेव दुग्धं गृहीत्वा स्वकुटुम्बं परिपालयति। अथ रथकारेण बल्लभत्त्वाद्दासेरक ग्रीवायां महती घण्टा प्रतिबद्धा। पश्चाद्रथकारो व्यचिन्तयत्–अहो। किमन्यैर्दुष्कृतकर्मभिः

यावन्ममैतस्मादेवोष्ट्रपरिपालनादस्य कुटुम्बस्य भव्यं सञ्जातम्। तत्किमन्येन व्यापारेण। एवं विचिन्त्य गृहमागत्य प्रियामाह–भद्रे। समीचीनोऽयं व्यापारः।

(अ) उज्ज्वलकः नित्यमेव दुग्धं ग्रहीत्वा कं परिपालयति ?

(ब) रथकारेण महती घण्टा कुत्र प्रतिबद्धा ?

(स) रथकारः किम् व्यचिन्तयत् ?

(द) भद्रे! 'समीचीनोऽयं व्यापारः' इति कः प्रियामाह ?

(इ) 'आगत्य'' इति शब्दे प्रकृतिप्रत्ययं च पृथक्कुरुत ?

(ग) मध्यप्रदेशस्य नगरीयं पौराणिकी ऐतिहासिकी च वर्तते। विदिशा पूर्वस्मिन् काले 'भेलसा' इति नाम्ना सुविख्याता आसीत्। एतस्य कारणं सूर्यदेवतायाः मंदिरस्य 'भेल्लस्वामिनः' इति लोक ख्यातिरेव। पुरा विदिशानगरी समुन्नतमेकं वाणिज्यिकं केन्द्रमासीत्। योगदर्शनस्य प्रणेता व्याकरणमहाभाष्यस्य कर्ता महर्षिः पतञ्जलिः सम्राट् अशोकोऽपि विदिशया सह सम्बद्धौ आस्ताम्।

(अ) मध्यप्रदेशस्य का नगरी पौराणिकी ऐतिहासिकी च वर्तते ?

(ब) विदिशा प्राचीनकाले कया नाम्ना सुविख्याता आसीत् ?

(स) ''भेल्लस्वामिनः'' इति कस्य मंदिरस्य लोकख्यातिः ?

(द) पुरा विदिशा नगरी कीदृशं केन्द्रमासीत् ?

(इ) महर्षिपतञ्जलिः सम्राट् अशोकोऽपि कया सह सम्बद्धौ आस्ताम् ?

प्र.16 अधोलिखितवाक्यानां कथानुसारेण क्रमसंयोजनं कुरूत– 5

(अ) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत् ?

(ब) गङ्.गातीरे मार्कण्डेयः नाम कश्चनमुनिः वसति स्म।

(स) मया रामदेवस्य जीवनम् एव अनुसरणीयम्।

(द) किञ्चिदग्रे गतः वासुदेवः काचिंत् देवालयम् अपश्यत्।

(इ) वासुदेवः तस्य प्रियशिष्यः आसीत्।

17. अधोलिखितपद्यांशानि पठित्वा संस्कृतभाषायाम् प्रश्नानामुत्तराणि लिखत (केचिद् द्वे) 10

(क) दानेन भूतानि वशी भवन्ति
दानेन वैराण्यपि यान्ति नाशम्।
परोऽपि बन्धुत्वमुपैति दानै–
र्दानं हि सर्वव्यसनानि हन्ति।।

(अ) दानेन कानि वशी भवन्ति ?

(ब) केन वैराण्यपि यान्ति नाशम् ?

(स) कैः परोऽपि बन्धुत्वमुपैति ?

(द) सर्वव्यसनानि केन हन्ति ?

(इ) ''हन्ति'' इत्यस्मिन् पदे किम् वचनम् अस्ति ?

(ख) मत्ता गजेन्द्राः मुदिता गवेन्द्राः
वनेषु विकान्ततरा मृगेन्द्राः।
रम्या नगेन्द्राः निभृता नरेन्द्राः
प्रक्रीडितो वारिधरैः सुरेन्द्रः।।

(अ) वारिधरैः कः प्रक्रीडितः ?

(ब) मुदिताः के भवन्ति ?

(स) के मत्ताः भवन्ति ?

(द) वनेषु मृगेन्द्राः कीदृशाः ?

(इ) सुरेन्द्रः कैः प्रक्रीडितो ?

(ग) दरिद्रता धीरतया विराजते
कुवस्त्रता शुभ्रतया विराजते।
कदन्नता चोष्णतया विराजते
कुरूपता शीलतया विराजते ।।

(अ) दरिद्रता कया विराजते ?

(ब) शीलतया का विराजते ?

(स) कदन्नता कया विराजते ?

(द) शुभ्रतया का विराजते ?

(इ) 'विराजते' इत्यस्य पदस्य धातुं लकारं च लिखत।

प्र.18 अधोलिखित अपठितगद्याशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि लिखत। 5

'शरीरं धर्मस्य प्रथमं साधनम् अस्ति। शरीरमाद्यं खलु धर्म साधनम्।'' शरीरस्य आरोग्यं व्यायामेन सिद्धयति। यः व्यायामं करोति तस्य प्राणशक्तेः आपदः स्वयमेव दूरं गच्छन्ति। व्यायामेन शरीरे शुद्धरक्त संचारः भवति। इन्द्रियाणि सुस्थानि स्वस्थानि च भवन्ति। जठराग्निः दीप्तः भवति। परिवृद्धम् उदरं सड्.कोचं गच्छति। मस्तिष्कम् उर्वरं भवति। अस्मिन् लोके जनैः वयोऽनुसारं कोऽपि व्यायामः अवश्यं करणीयः।

(अ) उपर्युक्त गद्यांशस्य उचितशीर्षकं लिखत।

(ब) धर्मस्य प्रथमं साधनं किम् अस्ति ?

(स) कीदृशम् उदरं व्यायामेन सड्.कोचं गच्छति ?

(द) शरीरस्य आरोग्यं केन सिद्धयति ?

(इ) जनैः वयोऽनुसारं कः अवश्यं करणीयः ?

प्र.19 स्वस्य प्राचार्यस्य कृते छात्रवृत्यर्थं प्रार्थनापत्रं लिखत। 4

अथवा

स्वस्य मित्रस्य कृते जन्मदिवसोत्सवस्य आमन्त्रण–पत्रं लिखत।

प्र.20 अधोलिखितेषु एकं विषयं स्वीकृत्यं संस्कृते निबंन्धं लिखत– 10

(क) सदाचारः।

(ख) संस्कृतभाषायाः महत्वम्।

(ग) मम दिनचर्या

(घ) उत्सवः (दीपावलिः)

# आदर्श–उत्तरपत्रम्
# हाईस्कूल परीक्षा–2012
# संस्कृतम् (सामान्यम्)

**(1) उचित विकल्प चयन (सन्धि)**

| | | | |
|---|---|---|---|
| (क) | ब. | गुणस्वरसन्धिः | 4 |
| (ख) | स. | सच्छीलः | |
| (ग) | ब | मनः+हरः | |
| (घ) | द | दुस्थलम् | |

**(2) उचित विकल्प चयन (समास)**

| | | | |
|---|---|---|---|
| (क) | स | हरिश्च हरश्च | 3 |
| (ख) | स | अनुरूपम् | |
| (ग) | ब | बहुब्रीहि | |

**(3) उचित विकल्प चयन (धातु रूप)**

| | | | |
|---|---|---|---|
| क | स | विधिलिङ्.ग | 4 |
| ख | ब | याच् | |
| ग | स | पठन्ति | |
| घ | ब | एकवचनम् | |

**(4) उचित विकल्प चयन (अव्यय एवं उपसर्ग)**

| | | | |
|---|---|---|---|
| क | अ | यावत् | 4 |
| ख | स | कुत्र | |
| ग | द | अस् | |
| घ | ब | प्रति | |

**(5) उचित विकल्प चयन (प्रत्यय)**

| | | | |
|---|---|---|---|
| क | द | कथितवान् | 4 |
| ख | स | आदाय | |
| ग | स | वर्धमानः | |
| घ | अ | टाप् | |

निर्देश :–प्रश्न क्र. 1 से 5 तक सही विकल्प लिखने पर प्रत्येक विकल्प पर 1–1 अंक प्राप्त होगा।

**(6) सूक्ति**

| | | |
|---|---|---|
| क | पठतो | 2 |
| ख | लघुत्वं | |
| ग | परोपकारः | |

निर्देश :– सही सूक्ति पूर्ण करने पर प्रत्येक पर 1–1 अंक अंक प्राप्त होगा।

**(7) उचित युग्म मेलनम–**

| | अ | आ | 4 |
|---|---|---|---|
| क | मार्कण्डेयः | मुनिः | |
| ख | बालैः सह सख्यम् | न कुर्यात् | |
| ग | आदि कविना | वाल्मीकिना | |
| घ | महापुरूषाः | प्रसिद्धाः | |

निर्देश :– सही जोड़ी मिलाने पर प्रत्येक पर 1–1 अंक प्राप्त होगा।

**8) शुद्ध/अशुद्ध वाक्य चयन**

क) न 4

ख) आम्

ग) न

घ) आम्

निर्देश :–सही आम् अथवा न लिखने पर प्रत्येक पर 1–1 अंक प्राप्त होगा।

(9) (1) गुणाः कुर्वन्ति दूतत्वं दूरेऽपि वसतां सताम्। 4

केतकीगन्धमाघ्राय स्वयमायान्ति षट्पदाः।।

(2) क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति।

अतृणे पतितो बह्निः स्वयमेवोपशाम्यति।।

निर्देश :– एवमेव स्वपाठ्पुस्तकात् कोऽपि शुद्धसुभाषितद्वय लेखनीयम्।

**निर्देश :– इसी तरह के अन्य शुद्ध सुभाषित श्लोक लिखने पर प्रत्येक श्लोक पर 2–2 अंक प्राप्त होंगे।**

**(10)** युग्ममेलनं कुरुत – 4

(क) बल्मीकेषु

(ख) दयानन्देन जागरिता

(ग) वाग्भूषणम्– भूषणम्

(घ) पुरूषादः– घटोत्कचः

**निर्देश :–युग्ममेलनं पर प्रत्येक पर 1–1 अंक प्राप्त होगा।**

**(11) शब्द रूपाणि** **4**

| | | | |
|---|---|---|---|
| (क) | रामस्य | रामयोः | रामाः |
| (ख) | पिता | पितरौ | पितरः |
| (ग) | हे राजन् | हे राजानौ | हे राजानः |
| (घ) | काम् | के | काः |
| (ड.) | त्वया | युवाभ्याम् | युष्माभिः |

**निर्देश :—निर्देशानुसार शब्द रूप लिखने पर प्रत्येक पर 1—1 अंक प्राप्त होगा।**

**(13)** शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत(केचित् चत्वाराः) 4

(क) आम्

(ख) आम्

(ग) आम्

(घ) न

(ङ.) आम्

निर्देश :—एक शब्द में सही उत्तर लिखने पर प्रत्येक पर 1—1 अंक प्राप्त होगा (कोई चार)

**(13) एक वाक्ये प्रश्नानाम् उत्तराणि**

(क) मैत्रेयी सीतां वेदानां संस्काराणाम् इन्द्रियनिग्रहस्य च ज्ञानं दत्तवती। 6

(ख) विदिशा मध्यप्रदेशे स्थिता विद्यते।

(ग) कृषीबलैः धान्यवृद्धयः समेधिताः भवन्तु।

(घ) मे मनः शिवसङ्कल्पम् अस्तु।

निर्देश :—एक वाक्य में सही एवं शुद्ध उत्तर लिखने पर प्रत्येक पर 2—2 अंक प्राप्त होंगे। (कोई तीन)

**(14) अशुद्ध वाक्यानाम् शुद्धि—**

(क) सर्वे बालकाः धावन्ति। 5

(ख) पत्राणि पतन्ति।

(ग) श्रीरामाय नमः।

(घ) बालकाय मोदकं रोचते।

(ङ.) जलं / जलेन / जलात् विना जीवनं नास्ति।

(च) बालकः जनकेन सह गच्छति।

निर्देश :—वाक्य शुद्ध करने पर प्रत्येक शुद्ध वाक्य पर 1—1 अंक प्राप्त होगा। (कोई 5)

**(15) गद्यांशानाम प्रश्नानाम् उत्तराणि—**

(क)(अ) न्यग्रोधवृक्षः कस्मिश्चित् ग्रामे आसीत्। 10

(ब) पथिकाः मार्गायासं परिहरन्ति स्म।

(स) पशवः छायार्थं वृक्षम् आश्रयन्ति।

(द) वि+रच्+ल्यप्

(ङ.) सप्तमी

(ख) (अ) उज्ज्वलकः नित्यमेव दुग्धं गृहीत्वा स्वकुटुम्बं परिपालयति।

(ब) स्थकारेण महती घण्टा दासेरकग्रीवायां प्रतिबद्धा।

(स) रथकारः व्यचिन्तयत् यत्—'अहो ! किमन्यैर्दुष्कृतकर्मभिः।
यावन्ममैतस्मादेवोष्ट्रपरिपालनादस्य कुटुम्बस्य भव्यं सञ्जातम्।

(इ) 'भद्रे ! समीचीनोऽयं व्यापारः इति' उज्ज्वलकः(रथकारः) प्रियामाह।

(ड.) आ उपसर्गः गम् (धातुः) + ल्यप् (प्रत्ययः)

ग) अ) मध्यप्रदेशस्य विदिशा नगरी पौराणिकी, ऐतिहासिकी च वर्तते।

ब) विदिशा प्राचीनकाले भेलसा इति नाम्ना सुविख्याता आसीत्।

स) 'भेल्लस्वामिनः' इति सूर्यदेवतायाः मन्दिरस्य लोकख्यातिः।

द) पुरा विदिशा नगरी समुन्नतमेकं वाणिज्यिकं केन्द्रमासीत्।

इ) महर्षिः पतञ्जलिः सम्राट अशोकोऽपि विदिशया सह सम्बद्धौ आस्ताम्।

निर्देश :–प्रत्येक सही उत्तर लिखने पर 1–1 अंक प्राप्त होगा । (किन्ही दो गद्यांशों )

**16. कथा क्रम संयोजनम् –**

ब) गङ्गातीरे मार्कण्डेयः नाम कश्चन् मुनिः वसति स्म।

इ) वासुदेवः तस्य प्रियशिष्यः आसीत्।

द) किञ्चिदग्रे गतः वासुदेवः कांचित् देवालयम् अपश्यत्।

अ) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत्।

स) मया रामदेवस्य जीवनम् एव अनुसरणीयम्।

निर्देश :– कथा के अनुसार क्रमशः वाक्य लिखने पर प्रत्येक क्रमबद्ध वाक्य पर 1–1 अंक प्राप्त होगा।

**(17) पद्यांशानाम् प्रश्नानाम् उत्तराणि–**

क 10

(अ) दानेन भूतानि वशी भवन्ति।

(ब) दानेन वैराण्यपि नाशं यान्ति।

(स) दानैः परोऽपि बन्धुत्वमुपैति।

(द) सर्वव्यसनानि दानेन हन्ति।

(इ) एकवचनम्

ख

(अ) वारिधरैः सुरेन्द्रः प्रक्रीडितः।

(ब) मुदिताः गवेन्द्राः भवन्ति।

(स) गजेन्द्राः मत्ताः भवन्ति।

द) वनेषु मृगेन्द्राः विक्रान्ततराः।

इ) सुरेन्द्रः वारिघरैः प्रक्रीडितः।

ग

अ) दरिद्रता धीरतया विराजते।

ब) शीलतया कुरूपता विराजते।

स) कदन्नता उष्णतया विराजते।

द) शुभ्रतया कुवस्त्रता विराजते।

इ) वि उपसर्गः राज् धातुः लट् लकारः

निर्देश :—प्रत्येक सही उत्तर लिखने पर 1—1 अंक प्राप्त होगां । (किन्ही दो पद्यांशों)

**(18) अपठित गद्याशः—**

अ) व्यायामस्य महत्त्वम् 5

ब) धर्मस्य प्रथमं साधनं शरीरम् अस्ति।

स) परिवृद्धम् उदरं व्यायामेन सड्.कोचं गच्छति

द) शरीरस्य आरोग्यं न्यायामेन सिद्धयति।

इ) जनैः वयोऽनुसारं व्यायामः अवश्यं करणीयः।

निर्देश :—प्रत्येक सही उत्तर लिखने पर 1—1 अंक प्राप्त होगा।

**19) पत्रलेखनम्**

छात्रवृत्यर्थम् आवेदनपत्रम्

माननीयाः प्राचार्यमहोदयाः,
शासकीय—उच्चतर—माध्यमिक—विद्यालयः
बैरसियानगरम्, मध्यप्रदेशः } 1 अंक

विषय :— छात्रवृत्तिप्रदानार्थम् आवेदनम्।

महोदयाः,

अहं सविनयं निवेदयामि यत् मम पितुः आर्थिकस्थितिः शोचनीया वर्तते। अहं शिक्षण— } 2 अंक
शुल्कम् अपि दातुम् असमर्था अस्मि। अतः मम कृते श्रीमन्तः छात्रवृत्तिं दापयन्तु इति प्रार्थये।

दिनांड्.क : 14.10.11 भवदीयः शिष्यः 1 अंक
क,ख,ग
कक्षा दशमी

———————————————

जन्मदिनोत्सवस्य आमन्त्रणम्

1 अंक

प्रियमित्र प्रमोदः:

नमोनमः,

महता हर्षेण सूचयामि यत् मम पुत्रस्य राहुलस्य प्रथमजन्मदिवसः 28/10/2011 2 अंक
दिनाड्.के शुक्रवासरे समायोजितः अस्ति।

कृपया अस्मिन् अवसरे समागत्य बालकाय स्वकीयं शुभाशीषं दत्वा कृतार्थयन्तु भवन्तः।

स्थानम् : दमोहनगरम्
दिनांक : 10.12.2011
समय : सायं 6 वादनतः 8 वादनपर्यन्तम् भवतः मित्रम् } 1 अंक
रजत शर्मा

## 20. निबन्धलेखनम् 10

### 1. सदाचार

सताम् आचारः सदाचारः इत्युच्यते। सज्जनाः विद्वांसो च यथा आचरन्ति तथैव आचरणं सदाचारो भवति। सज्जनाः स्वकीयानि इन्द्रियाणि वशे कृत्वा सर्वैः सह शिष्टतापूर्वकं व्यवहारं कुर्वन्ति। ते सत्यं वदन्ति, मातुः पितुः गुरूजनानां वृद्धानां ज्येष्ठानां च आदरं कुर्वन्ति तेषाम् आज्ञां पालयन्ति, सत्कर्मणि प्रवृत्ताः भवन्ति।

जनस्य समाजस्य राष्ट्रस्य च उन्नत्यै सदाचारस्य महती आवश्यकता वर्तते। सदाचारस्याभ्यासो बाल्यकालादेव भवति। सदाचारेण बुद्धिः वर्धते, नरः धार्मिकः, शिष्टो, विनीतो, बुद्धिमान् च भवति। संसारे सदाचारस्यैवमहत्वं दृश्यते। ये सदाचारिणः भवन्ति, ते एव सर्वत्र आदरं लभन्ते। यस्मिन् देशे जनाः सदाचारिणो भवन्ति तस्यैव सर्वतः उन्नतिर्भवति। अतएव महर्षिभिः ''आचारः परमो धर्मः'' इत्युच्यते। सदाचारी जनः परदारेषुमातृवत्, परधनेषु लोष्ठवत् सर्व भूतेषु च आत्मवत् पश्यति। सदाचारीजनस्य शीलम् एवं परमं भूषणं अस्ति।

---

### 2. मम दिनचर्या

प्रत्येकमानवस्य दिनचर्या पृथक् भवति। अहम् एकः छात्रः अस्मि। अहम् दशम्यां कक्षायां पठामि। अहं प्रतिदिनं प्रातः पञ्चवादने उत्तिष्ठामि। अहं चषकमेकं चायं पिबामि। अहं स्वमित्ररामचन्द्रेण सह भ्रमणाय गच्छामि। भ्रमणानन्तरम् अहं स्नानं करोमि। स्नात्वा विद्यालयं गच्छामि। विद्यालये प्रार्थना–घण्टिका भवति। सर्वैः छात्रैः सह प्रार्थनां कृत्वा स्वकक्षायां प्रत्यागच्छामि। तदनन्तरं कक्षायाम् अध्ययनं करोमि।

अर्धावकाशे मित्रेण सह भोजनं करोमि। पूर्णे अवकाशे जाते द्विचक्रिकां गृहीत्वा स्वगृहम् आगच्छामि। विश्रामं कृत्वा पाठशालायाः गृहकार्यं करोमि। सायंकाले अहं क्रीडामि। तदनन्तरम् अहं अधीतपाठानां पुनः अभ्यासं करोमि। अहं भोजनं कृत्वा दूरदर्शनं पश्यामि। दशवादने शयनाय गच्छामि। एषा भवति मम दिनचर्या।

—————————

3. संस्कृत भाषायाः महत्वम्

संस्कृतभाषा विश्वस्य सर्वासु भाषासु प्राचीनतमा सर्वोत्तमसाहित्यसंयुक्ता चास्ति। संस्कृता परिशुद्धा व्याकरणसम्बन्धिदोषादिरहिता संस्कृत भाषेति निगद्यते। प्राचीने समये एषैव भाषा सर्वसाधारणा आसीत्। सर्वे जनाः संस्कृतभाषाम् एव वदन्ति स्म। एषा एव अस्माकं पूर्वजानाम् आर्याणां सुलभा, शोभना, गरिमामयी च वाणी। संस्कृत– भाषाायामेव विश्वसाहित्यस्य सर्वप्राचीनग्रन्थाः चत्वारो वेदाः सन्ति येषां महत्वमद्यापि सर्वोऽपरि वर्तते। भास–कालिदास–अश्वघोष भवभूति–दण्डि–सुबन्धु–बाण–जयदेव प्रभृतयो महाकवयो नाटकाराश्च संस्कृतभाषायाः एव। जीवनस्य सर्वसंस्कारेषु संस्कृतस्य प्रयोगः भवति।

अधुनाऽपि सङ.गणकस्य कृते संस्कृतभाषा अति उपयुक्ता अस्ति। संस्कृतभाषैव भारतस्य प्राणभूताभाषा अस्ति राष्ट्रस्य ऐक्यं च साधयति। भारतीय गौरवस्य रक्षणाय एतस्याः प्रसारश्च सर्वैंरेव कर्त्तव्यः। अत एव उच्यते–

'संस्कृतिः संस्कृताश्रिता'।

————

4. उत्सवः (दीपावलिः)

जीवनसङ्ग्रामे रतानां जनानां खेदनिवारणाय देशे देशे उत्सवाः भवन्ति। उत्सवानाम् अभावे जनजीवनंनीरसं जायते। भारतवर्षे अपि बहवः उत्सवाः भवन्ति। तेषु उत्सवेषु मुख्याः दीपावलिः, रक्षाबन्धनं, विजयादशमी होलिका च सन्ति।

दीपावलिः कार्तिकमासे कृष्णपक्षे अमावस्यायां भवति। मनुष्याः गृहाणि सुधया, अङ.गनं च गोमयेन लिम्पन्ति। जनाः रात्रौ तैलैः वर्तिकाभिः च पूर्णान् दीपान् प्रज्ज्वालयन्ति। ते धनदेव्याः लक्ष्म्याः पूजनं कुर्वन्ति। दीपैः नगरं प्रकाशितं भवति। बालाः बहुप्रकारकैः स्फोटकैः मनोविनोदयन्ति, दीपावलीसमये वाणिजोऽपि स्वान् आपणान् बहुविधं सज्जयन्ति। विद्युद्दीपकानां प्रकाशः आपणेषु नितरां शोभते। नानाविधानि वस्तूनि क्रयविक्रयार्थं प्रसारितानि भवन्ति। अयं कालः नात्युष्णो नाप्यतिशीतो भवति। तेन मोदन्तेऽस्मिन् महोत्सवे नराः नार्यश्च।

**निर्देशः–**दिये गये निबंध में किसी एक विषय पर शुद्ध एवं सही 10 वाक्य लिखने पर प्रत्येक सही वाक्य पर 1–1 अंक प्राप्त होगा।